CC-0. Digitized by eGangotri and MIDF- Delhi

शिवलहरी

(स्तुतिकाव्यम्)



ठाकुरप्रसादशर्मा आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवलहरी

(स्तुतिकाव्यम्)

लेखकः

ठाकुरप्रसादशर्मा आचार्यः

सहायकप्राध्यापकः

प्रदर्शनीमार्गकाष्ठमण्डपस्थितस्य

वाल्मीकिविद्यापीठस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशक: लेखक: स्वयम्

प्रथमसंस्करणे

१००० प्रति

वि० सं० २०४२ वैशाखपूर्णिमा

(सर्वे मुद्रणाद्यधिकारा: लेखके एव सुरक्षिता)

मूल्यम् ४।-

मुद्रक:-

देव छापाखाना

पिपलबोट डिल्लीबजार

पो. बा. नं० ३०५२

काठमाण्डौं-२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्चिदावेदनम्

काव्यं किमिति तु प्रज्ञावन्त एव परिभाषन्ताम्, परमहन्तु काव्यस्य विषये केवलमेतावदेव जानामि यत् केनापि तन्निर्व्याजमाधुर्येण जीवनसन्तर्पणरसेन लावण्यसम्पदाच तदधीनताङ्गतोऽस्मि। तत्रापि भक्तिधारा तु जीवनसञ्जीवनीधारैव। भक्तिभक्तानां हृदयतो निःष्यन्दमाना सा पावनी गङ्गाऽस्ति या साधकं परमानन्दसागरेण सङ्गमयितुं पतिपदं पुरः पुरो वर्धमाना भवति। भक्तिरचना यदाऽऽत्मनः परमात्मानं प्रति निर्झरायमाणा स्यन्दते तदा ऽहं स्वयमपि तत्प्रवाहेण सहैव परमात्मनः सामीप्यं यास्यान्निव, प्रत्यक्षरं क्षरभावादक्षरभावंप्रति गमिष्यन्निवा ऽनुभवामि। वस्तुतो भक्तिरचनास्वेव स्वसमर्पणभावादात्मनः स्फुटं दर्शनं समुन्मीलति। यत्र स्वकालुष्यविलयान्निर्मलभावधारावाहिनी रचना कैलासतरङ्गिणीव कलकल्लोलकलालङ्कृता सती स्वतः कामपि रमणीयतामाधातुं प्रभवति।

हन्त परमद्य हिन्दुराष्ट्रे नेपाले देववाणीविकासमधुमासाः केवलं सहृदयानां स्मृतिपथमेवा ऽधिरोहन्ति। इदानीं तु परसभ्यताग्रहिग्रहग्रस्तः सनातनन्तयुगप्रकाशको ऽपि संस्कृतमार्तण्डश्चरमधाम्ना मन्दं प्रकाशमानो विरहविरक्तो ऽस्ताचलादवतरन्निव प्रतीयते। यतः परितो जडिमपूर्णमेव वातावरणं समुज्जृम्भते। स्वमार्ग्यजेतारो नेतारः स्वयं पदपदकरोगग्रस्ताः सन्तः संस्कृतस्योत्थानाय कथमपि स्वस्थं कार्यक्रममायोजयितुं चेतसा ऽपि न पारयन्ति। परसभ्यता क्रीतदासास्तु संस्कृतस्योत्थानाय न केवलं किमपि सृष्टुमेव अपितु दूराद् वक्रिमदृष्ट्या द्रष्टुं प्रष्टुमपि न वाञ्छन्ति। कतिपयदशकादितः संस्कृतोत्थाननाम्ना राष्ट्रियस्तरे प्रदर्श्यमाना अभिनयाः केवलं संस्कृतमार्यघट्टं प्रति प्रस्थापयितुमेव महत्साफल्यमधिगच्छन्तः प्रतीयन्ते। एतादृशे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थितौ संस्कृतस्यकृते ऽन्तिमगङ्गाजलं देयं वामृतसञ्जीवनीजलमनुसन्धेयमिति सुधीमतयो विचारयन्तु ।

अथ च संस्कृतो उपेक्षाभावं नीयमाने सति संस्कृतिर्विकृतितां कलाविकलतां राष्ट्रभाषाश्चा भाषतामधिगच्छन्ति । परहस्तचाल्यमानयन्त्रमयमानुषाणांजडिमविचारेणाच्छाद्यमाने चात्मनि पौरस्त्यदर्शनमप्यदर्शनतांग मिष्यदिवानुभूयते । किञ्च राष्ट्रनाम्नि मृत्पाषाणपिण्डे विद्यमाने ऽपि हि दुत्व हृदयञ्चेतन्यञ्च द्वयमपि नेपालस्य क्षीयमाणमिव वरीवर्ति । मोदकवृत्तिमोदमाना धर्माधिकारगो ऽपि स्वानपि सन्तानानन्धकारं प्रति प्रस्थापयितुं स्वीकृतवन्त इव प्रतिभान्ति, यतः सर्वे मौनमेवानलम्बन्ते । परितो दृष्टिपातङ्कुर्वतो दार्शनिकस्य दर्शकस्य हृदीत्थं प्रतिभाति, यदद्य हिन्दुराष्ट्रस्याप्यात्मा जानन्नपि दिनानुदिनं विकृतिमेवाऽनुधवञ्चस्ति । तथाहि विश्वरङ्गमञ्चेषु केवलनिगमाऽऽगमसम्पदास्वंमुनिप्रतिनिधित्वन प्रस्तोतुं यतमानेनापि नेपालेन संस्कृतस्योन्नतये मौनतावा वलम्ब्यते । किं बहुना राष्ट्रे ऽद्य केवलभौतिकविकासवादिनो यया कयापि वृत्या कैलासोत्तुङ्गभवनानि निर्मापि स्वं सर्वेश्वरपदवीमधिरोहयितु यतमानाः समुपलक्ष्यन्ते । इत्थं सर्वेरेवेश्वरम्मन्य माने सर्वेश्वरमये समये केषाङ्केषामवताराणां कया वा स्तेत्या केन वा विधिना स्तुतिर्नतिर्वा विधेयेति मूलमन्त्रस्य सम्यगज्ञानतया जड पशुभूतो ऽहं भूतनाथं पशुपतिनाथमेवाऽऽराधयिषुस्तच्चरणयोरुपस्थितोऽस्मि । हस्ते केवलं यथा कथाञ्चित्सञ्चिता काव्यप्रकाशनदक्षिणा हृदये च परमानन्दसागरसमुच्छलिता प्रस्तुता भावलहरी विद्यते ।

स्वसमयाभावे ऽपि मदनुरोधं सहर्षं स्वीकृत्य काव्यमेतन्निर्माल्य स्थले-स्थले स्वकीयामल्यविचारेण मामनुगृह्णन्तः सं० अ० सं० सहायकाध्यक्षाः प्रा० श्री ऋषिरामपोखरेलमहाभागास्तथाऽऽजीवनं स्वयमनन्ततापं सहमाना अपि अकिञ्चनस्यैतस्याऽऽध्यात्मिकजीवननिर्माणे सततं स्वमर्पयन्तः पूज्यचरणा गुरवः श्रीस्थानेश्वरपोडेलमहाभागाश्च सन्दर्भे ऽस्मिन हृदयत एव भूयो भूयोऽभिनन्दन्तो । एवं वाल्मीकिविद्यापीठे विराजमाना अनन्तज्ञानरत्नयो विद्वांसस्तो गुरवोऽपि मया सश्रद्धं स्मर्यन्तो ये समये समये यां कामपि मदीयां रचनामाकर्णयन्तः सवात्सल्यं मामुत्साहयन्ति । काव्यमुद्रणादि यावद् आरभ्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहयाऽऽगतप्रायामपि स्वपरीक्षामगणयन्तौ शास्त्रिप्रथमवर्षीयौ छात्रवरेण्यौ श्री भूपेन्द्र शर्मा भट्टराई श्री कृष्णप्रसाद शर्मा मरासिनौ च उभावपि शुभाशीर्धन्यवादभागिनौ स्तः ।

शिवलहरी प्रकाशिता मदीया प्रथमा कृतिः । काव्यभाषायां संस्कृतायां सत्यामपि लेखकस्य विचारव्याकरणाद्यशुद्धयश्च यदि भवेयुस्तदा विद्वांसः पाठका भवन्तोऽपि मे गुरव इव स्वशिक्षादिभिर्नूनमपि जनमिममनुग्रहीष्यन्ति । अकस्मादापतितया स्वस्य कार्यान्तरव्यस्तया जातानामसंख्यानां मुद्रणादिदोषाणामेकं शुद्धिपत्रमपि यथाशक्ति संलग्नं कृतमस्ति, यतस्तेषु तेषु स्थलेषु लक्षीभवन्तः पठन्तु सुधियः । शिवलहरी नैषा विद्वत्ताया मदझरी अपितु स्वतोनिःष्यन्दमाना भावनिर्झरिणीति विदाङ्कुर्वन्तु विद्वांसः । केवलं च्युतिधर्मसम्पन्नस्य च्युतयस्तुटय एव दृक्पथमवतरेयुः । अस्य कृते क्षमामेव याचे । अहं तु शिवशक्तितत्वं वाक्तत्वमपि किमप्यजानन् द्वयमपि सदा समानमिति ध्यायामि—

शक्तिश्लेषाऽऽजनरसमयं कृष्णपाषाणिरूपं
सेव्यं सद्भिर्दपि सुमनसां भोगयोगैरगम्यम् ।
नान्द्यानन्दप्रहसनरतं सत्पदार्थप्रपञ्चं
ध्येयं तत्त्वं किमपि वचसामर्धनारीशरूपम् ॥

विदुषामनुचरः

वि० सं० २०४२ वैशाख पूर्णिमा ठाकुरप्रसाद शर्मा आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समर्पणम्

श्री पूज्यपितृचरणानां पं. टीकारामशर्मणां पुण्यस्मृतौ सादरम् -

गुरौ साक्षाद् विद्या ऽध्ययनसमये द्यां गतवति
शिशोर्मे का ऽवस्था ऽजनि जनक ! ते जीवितुमपि ? ।
तथा ऽप्याशीर्वादात्समुपहरतो मे ऽद्य लहरी-
महो को ऽप्यानन्दो हृदि हि तव पुण्यस्मृतिपथे ॥
(१)

न चापल्याद्यातस्त्वमसि मुनिरोषानलपथं ।
तथा ऽपि क्षेमं ते क्षरतु शिवकारुण्यलहरी ।
कृपादृष्ट्या यस्य व्रजति हि परेतो ऽप्यमरतां
महादेवे तुष्टे भवति किमसाध्यं तदथवा ? ॥
(२)

बालकः
ठाकुर प्रसादशर्मा आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ

शिवलहरी

रसैरशेषै रसना-सनाथिनी
युगे युगे बालकला-विलासिनी ।
स्फुरच्छरत्पूर्णसुधाकरानना
शिवाय भूयान्मम हंसवाहना ।।

(१)

शिरः सङ्गा गङ्गा प्रलयदहनो यस्य निटिले
गले लोलद्व्यालो विषमपि सुधामश्नि शशिनः ।
स्वयं यो योगीशः स्वयमपि च योषार्धघटितः
कृपापारावारः स हि शिवमपारं दिशतु नः ।।

(२)

सशूलोऽ पि स्वस्थो गरलगलितोऽ प्यन्तकजयी
कपाली विश्वेशः स्वयमपि शिवोऽप्युग्रविकटः ।
श्मशाने वासोऽपि त्रिभुवननुतः पावनतनु-
र्न जाने ते लीलां त्वमसि नटराजः स्वयमपि ।।

(३)

समस्त्वं सर्वेषां विषमनयनोऽ प्यात्मनिलयो
द्विजिह्वालम्बोऽ पि त्वमसि शिव ! सत्सुन्दरमयः ।
विरूपाक्षो रौद्रोऽपि च मदन-सौन्दर्यहरणो
न जाने ते लीलां परमगहनो योगमहिमा ।।

(१)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिखामौलौ प्रायोजगति रमते यः शिखरिणि
तथा कण्ठेकालो भुजगभुगनन्तप्रहरणः ।
गुहस्नेहारूढः स्वरसमुदितस्ताण्डरतो
घनानन्दोल्लासी हृदि शिवमयूरो विजयते ॥

(५)

अदृष्टैस्तत्वज्ञैरपि जगति दिव्यैरभिनयैं–
र्नटन् वामाश्लिष्टोऽमरूनिनदानन्दरसिकः ।
अखण्डैरानन्दैः सह परिचितो यः स्वयमपि
स्फुरत्वात्मारामे मम स सतत ताण्डवगुरूः ॥

(६)

अपर्णा वामाङ्के हिमकनकवर्णा स्मितमुखी
गणेशश्चोत्सङ्गे विलसति वृषो यस्य पुरतः ।
गणाःपार्श्वे देवासुरमुनिवरैं वन्दितपदो
हृदम्भोजे नित्यं स्फुरतु विलसच्चन्द्रमुकुटः ॥

(७)

जटाबन्धो गङ्गा, मुकुटमपि वक्रा शशिकला
त्रिपुण्ड्रो लेपो वा शवमसितमङ्गेषु धवलम् ।
गले व्यालो माला वसनमपि नागाजिनमहो
विशेषः कोऽप्येषस्फुरतु हृदि देवोऽन्धकरिपोः ॥

(८)

स्वधाम भ्राजिष्णुश्चरमरुचिचामीकरमयो
हिमानीकुन्देन्दुस्फटिकघनसारोपमवपुः ।
स्मितास्यः कैलासाचलरुचिरलास्योऽन्धकहरः
कृपापारावारो हृदि सपरिवारो लसतु मे ॥

(२)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(९)

गुरुर्ब्रह्मा वाणी स्वयमपि न शेषोऽपि सकलं
विदुस्त्वां निःशेषं, श्रुतिरपि न नेत्येव वदति ।
तदा मे काऽवस्था पुरहर, तथाऽप्यक्षरमयः
स्वयं भक्तेः स्यन्दः क्षरति यदि दोषाय किमु मे? ॥

(१०)

न जाने ते पूजां न च सविधिकाराधनमपि
न वा ज्ञानं ध्यानं न रुचिरतरां वा स्तुतिमपि ।
परं जाने देव ! त्वमसि जगतां सङ्कटहर-
स्तथा त्वं भक्तानामपि सकरुणालम्बनकरः ॥

(११)

निलिम्पैः संत्यक्त स्त्वयि सलनुरक्तस्त्वदितरं-
विपद्ग्रस्वस्त्रस्तः पथि निपतितो दुर्दिनवशात् ।
भजे त्वां विश्वैकां त्वमपि यदि दीनं नदयसे
विषज्वालैलोढा ननु करुण-गङ्गा – लहरयः ॥

(१२)

खलानामर्चाभ्यः स्तुतिरतिनतिभ्योऽपि विरतः
प्रकारं स्तै स्तै श्चेच्छततत्करिष्यं त्वयि रतिम् ।
कृपाऽम्भोधिर्देवः प्रकटमभविष्यः किमु न मे ?
भजंऽ भक्त्या व्याघ्रं शिव ! परिभवन्कामसुरभिम् ॥

(१३)

सतां निन्दाभिर्वा कपटकुटिलैं ग्राम्यकलहैः
खलानां श्लाघाभि गुरुजननिशिद्धैश्च चरितैं ।
अभूवं पापात्मा यदि भव शरण्यं भवतु मे
शरण्यानां धर्मः स्वपदपतितं-त्राणमथवा ॥

(३)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(१४)

कृपैका चेन्नूनं नयति शिव! ते स्तुत्यकवितां
जडानन्धान्हीनानपि सुरगुरोर्गन्द्यपदवीम् ।
कृपाया लेशस्ते मयि च पतताकाक्षतिरितः
पुरे वाऽरण्ये वा समसलिलपाती जलधरः ॥

(१५)

कृपाऽस्त्रं चेद्येषामुपरि शिव ! ते मङ्गलकरं
तदा किं वा तेषां त्रिजगति पुनर्दर्लभतरम् ! ।
यदैश्वर्यादापुः कतिचन धनाधीश पदवीं
स्वयं भिक्षापात्री चरितमपि चित्रं तव विभो! ॥

(१६)

महेशस्त्वं साक्षाद् भुवनजननी ते सहचरी
गणेशः सेनानीरपि च तनयौ वीरकुशलौ ।
नगेशो वित्तेशः श्वसुरसुहृदौ विश्वविदितौ
पिनाकिन् ! तेऽसाध्यं किमथ मयि यद्यास्ति करुणा ? ॥

(१७)

सदा सन्तप्तानां शरणमिति शीतांशुमुकुटं
समापुस्त्वां दग्धाः स्वयमपि सुराः क्ष्वेडदहनात् ।
भवज्वालग्रस्तो यदि च पदयो स्तेऽस्मि शरणे
सुधासूतेः स्यन्दैः किमु न शिशुमुज्जीवयसि माम् ? ॥

(१८)

तपः सन्तुष्टस्त्वं स्वयमपि दशास्याय दयिता-
मदाः ऋष्यादाय, त्वयि समनुकुले न किमु वा ? ।
ऋते कारुण्यात्ते क्वचिदपि न पुंसां समुदयः
प्रभो तुष्टे सम्पद् भवति किल रुष्टे तु विपदः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(१९)

जपो ध्यानं दानं किमपि न च मे नार्चन विधिः
स्तुतिर्वा न ज्ञानं न च गुरुपदाराधनमपि ।
सदाचार भ्रष्टः खलवचनतुष्टः पशुमति-
स्तरेयं पारेऽब्धिं ननु पशुपतिश्चेदकरुणः ? ॥

(२०)

भवारण्ये दग्धो विषयविषदावानलगणैः
शरण्यं त्वां प्राप्तोऽमृतकिरणगङ्गाधरमहम् ।
सुधांशो निष्यन्दैरवि शिशिर वाग्भिश्चरितैः
कृपापारावार ! त्वरितमयि ! मां जीवय विभो ! ॥

(२१)

सहस्रं वर्षाणामिह विवदमानाः स्वयमपि
स्वतर्काब्धौ मग्नाः श्रुतिपथगता दर्शनगणाः ।
न तेऽप्यापुर्व्यक्तं यदि पशुपते दर्शनमहो
तदा मे काऽवस्था त्रिभुवनगुरुश्चेदकरुणः ॥

(२२)

स्वयं सिद्धो बुद्धः स्वयमपि वटुर्भाषणपटुः
स्वयं त्वं विश्वेशः स्वयमसि मुरारेरनुचरः ।
स्वयं व्यक्तं सत्यं स्वयमसि भवान्याश्छलकरः
स्वयं चैको मूर्त्या स्वयमसि च मूर्तित्रयमयी ॥

(२३)

स्वयं लीलेणस्त्वं स्वयमसि किरातो मृगहरः
स्वयं रुद्रो ध्वंसी स्वयमपि च रक्षाऽऽगमगुरुः ।
स्वयं वामाश्लिष्टः स्वयमपि च योगेश्वरगुरुः
हरोऽपि त्वं दाता जयति तव लीला रसमयी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(२४)

"असंख्याता रूद्रा" इति विविधवाक्यैः श्रुतिरपि
न साम्रेडं ब्रूते किमु, न निगमेऽस्तुत्यमथवा।
असंख्यैस्तें रूपैः किमु नटपते वाऽप्यभिनयै-
र्नभिन्नोऽप्यात्मा त्वं भवति किल रूपे विविधता॥

(२५)

न ते रूपं स्थानं न च किमपि लिङ्गं न च वयः
कथं त्वां जानीयां प्रभुवर! विभुं निर्गुणमहम्।
न हृद्या विद्या मे न च गुरुकृपा सिद्धिरपि वा?
निरालम्बे ध्यानं परमगहनो निर्गुणपथः॥

(२६)

न मूलं ते लब्धं यदपि हरिणा वाऽपि विधिना
तदेवापारं ते त्रिजगति महेशत्वमभवत्।
यथा वा– ते कर्माऽखिलमपि महत्वं प्रथयति
चरित्रं वा कर्म द्वयमपि महत्वं हि महताम्॥

(२७)

निपीतं तद्वालाहलमपि हि कल्याणकपरम!
सुधां दत्वाऽन्येभ्यः परहितवता स्वच्छमनसा।
न भोगी भोगीन्द्रैरपि परिवृतस्त्वं यदि विभो!
शिवत्वं त्यागे वा खलु सदुपकारे जयति ते॥

(२८)

निवासः कैलासस्तुहिननिकरोत्तुङ्गशिखरः
परं दिग्वासास्त्वं विविधपरिधानं न किमपि।
महाक्ष्वेडं कण्ठे तदपि यदि मृत्युं विजयसे
महिम्नः पारं ते व्रजति शिव! को वा त्रिजगति?॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(२९)

चिताया भस्मापि त्रिजगति वितन्वत्वपरिमलं
तव स्पर्शादेति ऽस्फुटमृगमदस्तुत्य पदवीम् ।
त्वया पीतं हालाहलमपि सुधागर्वमथनं
प्रभो ! सक्षान्मृत्युञ्जयति तव नामैव भजताम् ॥

(३०)

महापुण्यालब्धा शिव ! तव कृपासूक्ष्मकणिकां
भवन्त्येके रङ्का अपि कनकलङ्काधिपतयः ।
पुरारे दिग्वासाः स्वयमसि सदानन्दनिधहो
नहीच्छां जानीमस्तव पशुपते योगगहनम् ॥

(३१)

अयासीद्भूभङ्गादपि शलभतां यस्य मदनः
शरेणैकेनापि त्रयमपि पुराणां विलयताम् ।
समस्तं ब्रह्माण्डं यदपि तव नाट्यं तदथवा
नटस्त्वं ते कर्म प्रथयति च नाट्यं नटपतेः ॥

(३२)

सुरस्रोतस्विन्याः स्वयमपि भवाल्पावनपरो
जटाजाले भग्नो मरुविगलितः शीकर इव ।
प्रवाहो वाराञ्चे तव भव ! सहस्रञ्च शरदां
भविष्याम्युन्मुक्तः किमिहभवजालादहमपि ? ॥

(३३)

समायाद् या स्वर्गाद्भवजटिलजालं दलयितु-
महोऽज्ञैवेयं भो ! भवजटिलजाले निपतिता ।
भ्रमा न क्षीयन्ते स्वयमपि च येषां यदवधि
कुतो मुक्तिस्तेषां, क्वचिदपि न मुक्ति भ्रमवताम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३४)

र्न मन्येरन् के वा त्रिपुरमथन त्वां त्रिजगति
ऋते स्वर्गङ्गाया अवनिपतितायाः सुरपुरात् ।
पुरारे ! तत्तस्याः सदृशमथवा यत्त्वयि कृत-
मधोगच्छन्तीनां भवति किल बुद्धौ कलुषता ।।

(३५)

यथा वा तद्रोधः पवन भजमानाः कलुषिणो
विमुच्यन्ते दूरादपि यदि महद्वन्नु किमितः ? ।
शिरःसंगात्साऽपि व्रजति शिव ! ते चेदमलता-
मपारं माहात्म्यं तव किमपि जागर्ति जगति ।।

(३६)

अधोभाजां नित्यं सरणिमधितिष्ठन् स्वयमपि
प्रवृत्तिमात्मत्वाद्धरसि हर ! तेषाङ्करुणया ।
प्रसादं नेच्छन्ति क्वचिदपि च ते किन्त्वसमगा-
स्तमोऽन्धानां नीर्वभवति हि गतिर्नित्यसुगमा ।।

(३७)

तमोभाजो ये त्वां शशिमुकुटमात्मान्धकहरं
हरं नो मन्यन्ते द्युति झरमनोनिर्मलकरम् ।
स्वयं ते यान्त्यन्धस्तिमिरमपिलक्ष्याच्च्युतयथाः
कृतघ्नानां सद्यः फलति शिवगर्हाऽशिवकरी ।।

(३८)

विरज्यन्ते रक्ताः पदरजसि ते शान्तरजसो
विभूतौ वा भूतावपि समदृशो भक्तमुनयः ।
यथा वा त्वं साक्षात्कमलजल निर्लेपसमतां
दधानः कूटस्थो हृदि हि जगदात्मन् ! विजयसे ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३९)

त्रयीमार्गं त्रातुं भुवि समवतीर्यात्ममहसा
गुरुत्वं त्वं धृत्वा शिशुरपि दिशन्नात्मपदवीम् ।
अविद्यां घ्नन् शिष्यैस्तदाखिलटन् भारतमपि
स्वयं तीर्थीकुर्वन्जयसि जगतां शङ्करगुरुः ।।

(४०)

प्रकाशैश्चूडेन्दोरनिशमपि रम्ये मन मन-
श्चकोरः कैलासे विचरतु रतःसत् शशिधर ! ।
विकीर्णं देवाद्यैरपि नतिषु मन्दारकुसुमैः
पदद्वन्द्वं ध्यायेदविरतमहङ्काररहितः ।।

(४१)

विधिश्चेत्सृष्टौ त्वं हरिरसि जगत्पालनविधौ
लये रुद्रोऽप्येतत् त्रितयमपि नाट्यं तव विभो ! ।
त्वमेवैको ब्रह्म त्वमसि सकलं यत्किमपि वा
न शक्तेश्चेत्स्पन्दः श्वसति चजगद्वा जडमपि ? ।।

(४२)

हरौ वा भानौ वा द्विरदवदने वा त्वयि शिवे
तथाऽम्बायां वाऽपि क्वचिदपि न मे भेदविषयः ।
सुधा भिन्नान्मार्गानपि शतशः शैलसरितो
लयङ्गच्छत्यब्धौ किल विलयता भेदवपुषः ।।

(४३)

भजनन्त्येके द्वैतं ननु कतिपय ऽद्वैतपदवीं
विशिष्टञ्चाद्वैतं कतिचन, मतान्तो न जगति ।
अहन्त्वोत्वं मन्ये हरिहरविरिञ्चिप्रभृतिषु
स एवेशो व्यक्तो भवति पृथगात्मा न जगति ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न भेदः कोऽप्यास्ते पयसि खलु गङ्गायमुनयोः
रुचेर्भेदादेकोऽपि व्रजतु यदि वा स्तुत्यपदवीम् ।
यथादृष्टौ भेदो भवति न च वस्तुष्वपि तथा
स्वयं वस्तु स्वस्मिन् किमपि किल तन्निर्गुणमयम् ॥

(४५)

सुधार्थे सर्वेषामहमहमिका किन्तु न पुनः
विषं पातुम्चैकं पदमपि पुरोगच्छति जनः ।
त्वमेव स्वप्राणानपि न गणयन्किञ्चिदपि च
जगत्कल्याणाय त्रिनयन! विषं त श्च पिबसि ॥

(४६)

सुधां मन्यन्ते ते कतिचन मुधैवेन्दुजनितां
श्रमेः सिन्धूद्भूतामपि कतिपये मन्दरगिरेः ।
विदुर्नो सत्यां तां जगति तव नामाक्षरसुधां
निपीतायां यस्याममरपदवीं यान्त्यसुभृतः ॥

(४७)

यदैश्वर्यैश्चैव नेऽ निशमपि रमन्ते कतिपय
पिवन्तः स्वर्वामाधररसममन्दं सुरनराः ।
स्वयं भोगाद्भीतः स्मरहर ! सदा योगनिरतो
यथार्थं स्थाणुत्वं भजसि खलु चित्रा तव रुचिः ॥

(४८)

स्वयं दण्डयो दक्षस्तिभुवनगुरोर्गर्हणपरः-
स्त्वया नीतो भीतोऽनघइव यदा क्षम्यपदवीम् ।
तदाऽन्येषां ङ्क्षेषामुपरि न दया तेऽस्तु भजतां-
मनन्या भक्ति स्ते क्वचिदपि न सा निष्फलवती ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(४९)

चकम्पे कैलासो दशवदनरक्षोभुजगणै,
विवर्णासाऽपर्णा सुरतविरता, विभ्यति गणाः ।
न रुष्टःकिन्तु त्वं क्षणमपि ततोऽप्यत्रमुदितः
स्वभक्तस्योत्कर्षे क्वचिदपि न तेऽ मर्षविवशः ॥

(५०)

खलाकिर्णां त्यक्त्वा नगरवसतिं निर्झरगुहा-
मरण्यानीं याता स्त्वयि शिव ! रमन्ते हि यतयः ।
यदङ्के खेलन्ति स्वशिशव इवानन्दचपला
विहङ्गानां शावा हरिणशिशुभिर्हन्त मुदिताः ॥

(५१)

अहो ते खण्डेन्दो डंमरूनिनदेभ्योऽपि नटतः
कथं कौमुद्येषा जगतिनिरगच्छद् ध्वनिमयी ? ।
महाशेषोऽनन्तः स्वयमपि च यद्धारवलयाः
स निःशेषस्तस्याः न भवतु भवान् भूति रथवा ? ॥

(५२)

सुभक्तानां नित्यं वससि हृदि ते ऽनन्यमनसा-
मतो मां द्रष्टुं त्वं खलु निरवकाशः स्वयमपि ।
तथाऽपि त्वन्नामाक्षरमधु पिबन् मत्तमधुप-
रसक्रीडां कुर्वद् विलयमयताञ्जीवनमिदम् ॥

(५३)

रजोभाजो यान्ति क्वचिदपि न ते मुक्तिमिति तु
प्रसिद्धिर्वा शास्त्रं द्वयमपि हि नित्यं द्वदयति ।
परन्त्वेतच्चित्रं त्रिनयन ! यतस्ते ऽङ्घ्रिरजसा
विमुच्यन्ते सद्यो द्वयमधिगता भक्तमुनयः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(५४)

स्तवैर्ब्रह्मादीनामयमनधिगम्यस्तवमहो
स्फुरद्धाम्ना दीप्ताः स्वहृदि शशिमौलेर्निवसतः ।
विभूत्यां कन्थायामिव विभवमद- कौलेरपदवीं
हसन्त्यात्मारामा न खलु विरतेः शान्तिरपरा ।

(५५)

बलाद् ध्यातं रूपं न तदवितथं नूनमपि ते
परं सत्यात्सत्यं त्वमसि निगमात्मा ऽक्षरमयः ।
न साक्षात्स्वाते मे ऽन्यतरसि कुतो ध्यानमपि ते
ऋते ते कारुण्यात्क्वचिदपि न ते दर्शनमयि ! ॥

(५६)

विभिन्नाः संस्काराः किम भुवि जनानां प्रकृतयो
विभिन्नास्तच्छुष्टं मनसि तव रुग्ऽच्च विविधम् ।
न भिन्नः किन्तुत्वं, यदि समुदयेश्वन्न हृदये
कुतः सत्यं धामस्फुरतु च शतं जन्मशिरपि ? ॥

(५७)

लभन्ते के वा त्वां त्रिनयन ! विनाभक्तिमपि ते
ऋते त्वत्कारायाद्भवति च कुतो भक्तिरथवा ।
त्वदाप्तौ त्वं मार्गो गुरुरपि स लक्ष्यञ्च चरमं
नहीशात्सर्वस्वं किल तदपरं यत्त्रिजगति ॥

(५८)

ऋते यद्वाञ्छाया श्चलति पवनो ऽप्येष न मनाग्
न वा मर्त्याः कर्मानुसृतमतयो यान्ति च यथा ।
समस्तं ब्रह्माण्डं हृदि हृदि वसन् भ्रामयति यः
स नः सत्कल्याणं रचयतु शरण्यञ्च भवतु ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(५९)

सुरास्तेऽप्यन्येषां दलयितुमलं सन्ति कलुषं
विशेषः को वा ते पुरहर ! तदंहो ऽपनयने ? !
ममापि त्वं पापं त्रिविधमपि तापंञ्ज तिरथे-
हँरस्यौचित्यं ते, विलसति महेशत्वमपि तत् ॥

(६०)

त्वमार्धि क्षुद्राणामपि यदि न हर्तुं प्रभवसि
महेशत्वं दूरं व्रजति किक्त लज्जाविधुरितम् ।
अनाथस्योद्धाराद्भवति महिमा वा भुवि यशः
उपेक्षा स्वल्पस्याप्युदयछविहन्त्री हि महताम् ॥

(६१)

ददौ दृष्टिं वक्रामपि न शिव ! यस्मै: जलधिजा
ददन्तुष्ट स्तेभ्यः सपदि सुमहैश्वर्यमतुलम् ।
त्वमौदार्यात्लिलक्ष्मीमपि गलित गर्वां रचयसि
मदान्धानां सद्यः फलति सदवज्ञापरिणतिः ॥

(६२)

गिरां देवी साक्षाच्छिव' तव गुणा कर्षंगपरा
निवद्धा वीणाया इव रसमयी ब्रह्मपरमा ।
स्वयं त्वां याता त्रेतव खलु गुणानामवगुणो
यतस्ते सम्पर्काद् व्रजति हि जगन्निर्गुणपथम् ॥

(६३)

मुहुं राहुक्षीणो मुहुरपि कुहूखण्डितकलः
शशाङ्को ऽ यं साक्षात्स्थित गुरूकलङ्को ऽ पि सहसा ।
त्वया चेन्मौलौ ऽ य स्वशिरसि कलानाथपदवीं
द्विजानां नाथत्वं व्रजतु किमु नायं त्वयि रतः ? ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(६४)

दिधक्षललोकैकं जगति न विषं तज्जलधिजं
विषं मे पापं यद् दहति किल लोकान्तरमपि।
निपीयैतन्नाथ ! त्वमथ गरिमाणं द्रढय भो'
न चोत्कण्ठाल्लग्नो ऽ यसरति कलङ्कोऽपि किमु ते ? ॥

(६५)

यथा वा कण्ठान्तर्गलितमपि हालाहलममुं
रुणत्स्यन्तः पातात् यदपि किल पातुं तदपरम्।
अलङ्कुष्टान्मा मोद्गम तमपि गङ्गाधर ! विभो !
निपीते ऽ स्मिन्नन्त विषमपि सहैवैष्यति न किम् ? ॥

(६६)

स्वयं सर्वज्ञेन स्मरणपथनीतो ऽ पि स पुरा
शिवत्वं जानीते न कुसुमशरः किन्तु तदुभौ !
स्वयं जानीत श्वेत्कुसुमदशनो वा दशमुखः
स्वसंस्काराभावे किमिह कुरुते वा स्मृतिपथः ? ॥

(६७)

अहो सन्तो ऽ नन्ता जगति शिवलीलारसमदे
नटन्त्युद्गायन्ति क्षणमिव च यज्जीवनमपि।
शिव ! त्वं जानीते यदि किमपि चे त्तस्य कृतिन-
स्तदा तज्ज्ञातव्यं किमु समवशिष्यं त्रिजगति ? ॥

(६८)

सहेलं ये यान्ति स्वयमपि सुकर्माजितपथाः
किमेतद्वैचित्र्यं यदि नयसि तानेव सुगतिम् ? ।
अनेभ्यो मां गङ्गाधर ! यदि तु पारेभवमपि
तदा विश्वेशत्वं प्रकटमभविष्य त्त्रिजगति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(६९)

अनाथोऽहं दीनो विरहविकलो दैवदलितः
सुवद्दाष्पाम्भोभि श्चरणतलयोस्ते ऽस्मि पतितः
तदापि त्वं दृष्टिं क्षिपसि यदि हौनं प्रति न चो-
न्निराधारा सृष्टि र्व्रजतु शरणं कस्य पुरतः ।।

(७०)

वृहद्भानुर्भानु विधुरपि च नेत्र त्रयमहो
तथा केशा व्योम भ्रमति पुनरत्र त्रिपथगा ।
कृशानू रेतस्ते भुवनमपि ते विग्रहमयं
भवा ऽम्भोधेरन्तः किल दुरविगम्यं निगमभिः ।।

(७१)

प्रबोधे स्वप्ने वा तव पदसरोजं मम मनो-
मिलिन्दो ऽविश्रामं भजतु भवविश्रान्तिजनकम् ।
जगद् भ्रामं भ्रामं विषयविषसन्तप्तवपुषो
हरो मे ऽन्तर्वह्निं हर सपदि गङ्गा शशिधरः ।।

(७२)

न याचे त्वां मानं न सुररमणीं वाऽपि न मणिं
न नाकं पाकारेः क्वचिदपि न मुक्तावपि मनः ।
प्रसन्न श्चेच्छम्भो' मयि निपतिते ते चरणयो-
रनन्यैषा भक्ति र्भवतु तव जन्मान्तरहिता ।।

(७३)

समृद्धं तन्मा ऽभूद्यदशिवमयं मे क्षणमपि
वरं भूयाद्घोरा विपदपि यदि स्याच्छिवमयी ।
विपत्तावेव त्वं हृदयमधिरूढो भवसि चेद्
न सौख्यं स्वप्ने ऽपि प्रभुवर ! भवे तव द्विरहितम् ।।

Jayatu Sanskritam; Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(७४)

न मूयात्स्वर्गोऽपि त्रिनयन ' त्वया चेद्विरहित-
स्त्वदालोकैः पूर्णो यदि निरय एवास्तु स वरः ।
धनस्निग्धं नूनं मरूमपि भजेच्चातकमनो
निरभ्रं न स्वर्गं सुरवरसरित्क्षालितमपि ॥

(७५)

प्रयान्त्यन्ये तीर्थं द्रविणपतयो भाग्यसबलाः
कथं गच्छेयं मे किमपि न पथे शम्बलमिति ।
सदा कल्पायन्ते वत मम निमेषा अपि विभो ।
सवद्वाष्पाम्भोभिः सह विगलितं जीवनमपि ॥

(७६)

स्थितायां श्रद्धायां स्वहृदि बलवत्यामपि रूचा -
वभावात्सामग्र्या, स्थितवति मयि व्याकुलतरे ।
यथार्थो ऽर्चाऽभावो मम मनसि सङ्कल्पजनितो
विधिर्वा : किं न स्या त्तव सहि मुदे मानसविधिः ? ॥

(७७)

स्वरुपं ध्यायामि प्रभुवर ! यदा ते कथमपि
तदात्वं नायासि क्वचिदपि मनो मन्दिरमधि ।
गलद्वाष्पाम्भोभिः क्षणमिव ततः क्षालितहृदि
निराकारं ज्योतिः स्फुरति किमपि ध्वान्तहरणम् ॥

(७८)

विभो ! त्वां ना ऽ पश्यं क्वचिदपि पुरा जन्मनि यतः
इदानीं जातो ऽ स्मि त्वरयति विदृक्षा च मम सा ।
लभे त्वां नो यावत्त्रिनयन' जनिष्ये पुनरपि
प्रसीद त्वं चण्डीरमण' तिरयान्तस्तृषमतः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(७६)

किमेतास्मिन्जमन्यपि शिव ! न ते दर्शनमयि ।
तदा दुःखस्यान्त स्त्वहह न कदापि प्रभुवर ! ।
विभुं त्वां नापश्यं यदपि हृदि दिव्यन्तमपि तत्
फलं मे पापानां न तु तव कृपालोरकरुणा ।।

(८०)

शरीरत्वाद् दृष्टौ स्फुरति मम संसारसरणि-
र्भविष्यत्यन्तै यत् स्वयमपि महाकालकवलः ।
लयं यास्यत्येवं क्षितिरपि च यस्यामसुभृत-
स्त्वमेकः कूटस्थः पुनरपि हि शेषस्तु न परः ।।

(८१)

न बन्धुर्नो भ्राता न मम सुहृदो वा न पितरौ
न जाया सन्तानादिकमपि न वावेश्मपशवः ।
स्वसंस्कारो हेतुः क्षणिकजगदासङ्गमविधौ
त्वमेवात्मा सत्यं हृदि पशुरते ! कोऽप्यविरतम् ।।

(८२)

न सूर्यो नेवेन्दु र्न च जलदाराा न पवनो
न भूर्नेवाकाशो न किल विदिशो नेव च दिशः ।
किमर्थं तृष्णे ! त्वं पुनरिह वृथा भ्रामयसि मां
श्रयेऽहं वैराग्यादथ तु पदयुग्मं पशुपतेः ।।

(८३)

कृता येषां सेवा हृदयवचनैः कर्मभिरपि
त एवैते पश्चात्परमपुतां यान्ति यदि मे ।
अहोधिक्संसारं पिशुनमलिनं धिङ्मुहुरपि
खलानां धिग्दासं मतिविरहितं मां पुनरपि ।

(१७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(८४)

कृता हिंसाऽन्यषां प्रणयमनसाऽन्यस्य च वधात्
न तेषां सौहार्दं न च कलुषभागी मदपरः ।
भवीं: कालो व्यालो विकटकुटिलः स्वार्थगरलो
यतो भीतः कम्पे भव मम शरण्यं भव! हर !।

(८५)

विकासे पुष्पाणामिव सुखविकासेष्वपि नृणां
रसास्वादे भृङ्गाइव निकटतां यान्ति सुहृदः ।
समीपे के वा स्युः कुपथपततां दुर्दिनवशात्
त्वमेवानाथानामसि शरणमेकः पशुपते ! ॥

(८६)

स्वयं नग्नो जातः पुनरपि च नग्नस्य विलयो
न चानीतं गर्भात्किमपि न च नेतव्यमपि वा ।
तथाप्याशक्तिर्वा रतिरियमहो किं न विरति–
र्यदङ्के ब्रह्माण्डं स्वपिति जगदम्बा जयति सा ।।

(८७)

कृतं सम्पद्ध्यानं कलुषहरयो स्ते न पदयो–
र्मतिर्दत्ता पापे क्वचिदपि न सत्सङ्गविषये ।
कृतं मौनं सत्येष्वनृतविषये ऽभून्मुखरता
भ्रमन्तृष्णारण्ये शिव ! विगालितं जीवनमपि ।।

(८८)

सदा यूयं धन्या जगति मुनयो ये भवविदो
जगत्सङ्गं त्यक्त्वा ऽभजत सरितां सङ्गममहो ।
वयं दग्धा हहो! विषयविषतापैः परिगताः
प्रविश्यान्तर्वह्निं :सुखमिति पतङ्गा इव वत ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(८९)

स्वकीयं मत्वाऽहं निकटमनयं भो यममयं
स एवाकस्माच्चेत्प्रहरति बिना कारणमपि ।
स्मरारे ! के केषाङ्कपटमयसंसारसरणौ
सुधाभ्रान्त्या पीतं शिव! शिव! विषं प्राणहरणम् ।।

(९०)

कृतास्ते शृङ्गारा ललितलितौ वेषरचने
रमत्यैत्वभ्रान्त्या मृतवपुषि रात्रिन्दिवमपि ।
शनैः रस्मिञ्जीर्णे सति विकृतवर्णेऽन्तकमयाद्
भजेऽहं त्वां मृत्युञ्जयमयि ! मयि त्वं कुरु दयाम् ।।

(९१)

असंख्याता याता यमपुरमयि ! स्वस्य पुरतः
कुतो वेदानीं ते दृशि परिचिता बालवयसः? ।
अवश्यं जातानां मरणमिति बुद्ध्वाऽपि सततं
मनो मे नास्मार्षीस्तदपि वत मृत्युञ्जय-पदम् ।।

(९२)

पुनर्मातुः पीडा पुनरपि तथा मोहनिगडः
पुनः सम्पाचिन्ता क्वचिदपि विरामस्तु न पुनः ।
पदद्वन्द्वं ध्यायन्गलितभवबन्धस्तव विभो !
कदाऽऽनन्दे मग्नो जगति विचरिष्यामि जडवत् ।।

(९३)

व्यतीतां क्रीडायां स्वसमसखिभिः शैशवमहो
गतं मे तारुण्यं प्रणमयमदिरायामिदमपि ।
शनैः गात्रे जीर्णे कतिपयदिनान्येव वसति
स्तथाऽपि त्वं किं मे हृदय! भजसे नान्तकजयम्? ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi

वलिष्ठे त्वं तृष्णे ! नयसि विषयारण्यसरणौ ?
न मोहस्यान्तो मे पुनरपि न बोधः किमुदितः ? ।
कदा निःसन्तापं मिलति तव मृत्युञ्जय ! पदं
यतो दुःखान्तः स्यात्पुनरपि न मे जन्ममरणम् ।।

(९५)

पुनः प्रातः सायं पुनरपि दिवा चैव रजनी
पुनर्निद्राबोधौ पुनरपि तथाऽऽयान्ति ऋतवः ।
पुनः क्षीणोऽपीन्दुः समुदयति राकामधिगतो
न तारुण्यं पुंसां, पुनरपि न संसारविरतिः ? ।।

(९६)

न पीतं वाष्पाम्भो रुधिरमपि वा सोत्सवमहो ?
न भुक्तं किं मांसं, छलकलहकेली न विहिता ? ।
श्रुतिर्ङ्कं नार्तानां रुदितमयसङ्गीतमपि वा ?
यतोऽनुष्ठानं ते भुवि तदवशिष्टं पुनरपि ? ।।

(९७)

कदा पुण्यारण्ये हर! 'हर'! महादेव'! गिरिश!
प्रसीदं त्वं चण्डीरमण! 'इति' साश्रु प्रलपतः ।
सुधाऽऽस्वाद्यं पुण्यं शिशिरजलमातृप्ति पिवतः
सुखं यास्यत्येतत्क्षणमिव विभो ! जीवनमपि ? ।।

(९८)

कदा ते नामानिस्मरहर' जपन् निर्मलमनाः
भ्रमन्तीर्थे तीर्थे सुविमलसरिन्मज्जनपरः ।
हसन् क्रन्दन् नृत्यन् गलितमदुपाधिर्नयनयो-
रहं रस्यं पश्यन् भुवनमपि ते मन्दिरमयम् ? ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गलो वाष्पारुद्धो नयनयुगलेऽ प्यश्रुलहरी
सरोमाञ्चं गात्रं करणनिकरः शून्य इव मे।
भविष्यत्योवं मे पुरमथन! ते कीर्तन विधौ
कदाऽऽकर्ण्याम्भोतद्भुवनमपि साक्षाच्छिवमयम् ?।,

(१००)

कदा स्वर्गङ्गायाः पुलिनमधितिष्ठन् चरणयोः
समर्प्यात्मानं ते भजनरसमग्नो ऽनिशमपि।
असारात्संसाराद्विरतहृदयो ध्यानविधिना
सुखं नेष्याम्येतत्क्षणमिव विभो! जीवमिदम् ॥

(१०१)

कदावोच्चैः क्रन्दन् रजसि विलुठन्मन्दिरभुवो
नमन्नुद्गायन्त्वां मुहुरनुवदन्नश्रुकलुषः।
प्रकल्पन्नुद्दाम्नं पुनरपि नटन्ताण्डवमहं
भ्रमिष्यामुन्मुक्तः शिवरसमदोन्मत्तहृदयः ॥

(१०२)

पदाद् भ्रष्टा विष्णोरतलमभियान्त्यूर्ध्वजवना
सुखस्पर्शा ऽमर्षादिव कलुषिता शैलदहितुः।
शिरस्था ते गङ्गा प्रियतमतयोद्धारमहिता
तरङ्गैरङ्गान्तर्दुरितशमनायास्तु मम सा ॥

(१०३)

स्वयं गौरी काली स्वयमपि च चण्डी शिवमयी
तथा ऽपर्णाऽपीशा निखिल-जगदम्बापि गिरिजा।
स्वयं रौद्री चोग्रा त्रिपुरललिता या स्वयमपि
विचित्रा ते वामा स्फुरतु मयि सा दक्षिणमयी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDI - Delhi

(१०४)

कुमारो ऽपि प्रौढो रिपुसदसि वस्तारकरिपुः
स्वयं विघ्नेशोऽपि स्वयमपि च विघ्नप्रथमनः ।
कुमारौ मारारे स्तव सुरपुरोगावापि च तौ
सदा न स्त्राद्योतामरगणसिद्धचादिसहितौ ।।

(१०५)

तमो मुष्णन्निन्दोरमृतकिरणैः पुण्यसलिलैः
निसिञ्चन् गङ्गायाः स्मृतिसरणिनीतोऽपि सहसा ।
समाश्लिष्टो गौर्या जलद इव शुभ्रश्चपलया
हरो मे देहान्ते हृदयगगनान्तर्विलसतु ।।

(१०६)

शिवारण्ये मन्त्रे मे स्थितवति च चिन्तामणिमये
त्रिलोके ऽपि स्यार्त्तिः ननु हृदय; ते दुर्लभतरम् ? ।
भजन्तो ये साक्षा ज्जनिहरणमृत्युञ्जयपदं
कुतस्तेषाँ स्वप्नेष्वपि मरणजन्मादिकमहो ।।

(१०७)

खलाकीर्णोऽपि त्वं जयसि खलु संसार! हृदि मे
यतो निःष्यन्दन्ते विरतिरसगङ्गालहरयः ।
नमस्तेभ्यस्तेभ्यः खलजनगुरुभ्योऽञ्जलिरपि
स्मृतां यैभ्यः साक्षात्सपदि भगवत्पादकमलम् ।।

(१०८)

परात्मा त्वं जीव !, स्मर न भव दुष्टेन्द्रियचरो
न तेषां दासस्त्वं जहिहि भवपाशं 'त्वमसि तत्' ।
गुणैर्नो वध्योथा न च खलमयैरिन्द्रियगणैः
प्रपञ्चेभ्यो मुक्त स्त्वमसि हि शिवः कस्त्वदपरः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(१०९)

यदा भोगो नश्येत्तदसृतजन्मान्तरपि
त्वमेकः शिष्येथा न हि किमपि वस्तु त्वदितरम् ।
न कालोऽ प्यव्यक्तौ सकलपणिाम्नां विगलना-
त्वमेकश्चतन्य किमपि हि विकाराद्वि– रहितः ।।

(११०)

यतो भेदः सर्गेविलसति पुनर्नापि विलये
ततो दृष्टौ भ्रान्तिः प्रकृतिरिति भिन्ना मम मतिः ।
स्वसंस्कारव्यक्ति र्भवति जननं चेत्तनुभृतां
विभिन्नाः संस्कारा जगति तदनन्ताः प्रकृतयः ।।

(१११)

अतोऽभूद्भिन्नैषा प्रकृतिरपि संस्कारवशतो
निसर्गः सर्गो वा द्वयमपि सदा व्यक्तिरथवा ।
त्वमात्मन् ! निर्लेपो वपुषि विकृति स्त्वव्यपि न सा
न सृष्टि स्ते नूनं प्रकृतिगुणभिन्नस्य, तु तनोः ।।

(११२)

गुणेभ्यस्त्वं भिन्नः पुनरसि गुणी चिद्घनरसो
नभिन्न श्चानन्दो न च किमपि ज्ञेयान्तरमतः ।
न बाह्यश्चानन्दः स्वहृदि रसनास्वादजनितः
परब्रह्मास्वादो मे किमिव मदुपाधेर्विगलनम् ।।

(११३)

विलीनायां शक्तौ स्वयि न शिव ! वस्त्वन्तरपि
त्वमेवैको ब्रह्म स्फुरसि' न तदा व्यक्तिरथवा ।
न शक्तेर्भिन्नं तद्भवति दृशि कार्यं यदपि च
त्वमेवैको हेतुः किल सकलनाट्ये नटपते ! ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(११४)

समाश्लिष्यन् शक्त्या स्वमपि तदसिन्नं घटयता
समं स्त्रैणं पुंस्त्वं द्वयमिति रहस्यं प्रकटितम् ।
यथा वा तद्गूढं किमपि शिवशक्त्योरविषमं
समात्मत्वञ्चोक्तं नखलु पृथमात्मा क्वचिदपि ॥

(११५)

अहो यत्पूजार्थं करकलितकल्हारकुसुमाः
रजः पातोल्लज्जाऽवनतमुखगीर्वाणललनाः
क्षमां त्वां याचन्ते यदि रुचिरपूर्णेन्दुरुचय
स्तदा ते किं भूया त्परुषपदराजिः स्तुतिरियम् ? ॥

(११६)

प्लवन्तां मथ्नन्तु प्रबलभुजबन्तो जलनिधिं
समुड्डीयन्तां वा धनपथमतिक्रम्य तरसा ।
सदाऽविष्कुर्वन्तु प्रविधिपथतीर्णाः किमपि ते
न जानीरन्त्वां तु क्वचिदपि जना भौतिकदृशा ॥

(११७)

वसन्त्येकस्मिञ्चेत्सरयसुरगङ्गालहरयो
विषं, ज्वाला वन्हे रमृतकर मार्तण्डरुचयः ।
कपालं वा भूतिस्त्वयि विषमनटाद्यञ्च नटति
धिग्रा संसारिण्या स्पृशति शिवतत्वं किमुजनः ? ॥

(११८)

निजैश्वर्यं दत्वा स्वपदमयि ! विस्मारय न मां
यदन्ये याचन्ते भवतु शिव! तेषामुपकृतिः ।
प्रियं, तेषां येषां यदभिलषितं तद्वितरणं
मनुक्षोर्नाभीष्टं सदलबलमेन्द्रं पदमपि ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(११९)

अवश्यं यातव्यं, क्षणमपि न मां मोहय रमे !
रमेऽहं सानन्दं हरचरणपद्मे घनरसे ।
रसास्ते तिष्ठन्तु, प्रकृतरसमात्रेण किमु वा ?
स्वयं भक्तेः स्यन्दो जयति रसराजो यदि हृदि ? ॥

(१२०)

कुटीरे वा तीरे विमलपयसः पुण्यसरितः
शरण्ये वाऽरण्ये मुनिचरणपुण्ये प्रवयसः ।
प्रसङ्गो वा सङ्गो भवतु भवभङ्गाय भवतो
यतोऽखण्डानन्दो हृदयकमलान्तर्विलसतु ॥

(१२१)

भवाब्धेर्गाम्भीर्यं सुविदितमिहागाधपयसः
प्लवन्ते यद्भीताः पवनजवना श्चेत्कतिपये ।
परे ते कुम्भान्तर्जलमिव पिबन्त्येकचुलुके
निगीर्यन्ते ग्राहैर्निगम गतिहीनास्तु पयसि ॥

(१२२)

भजन्ते ये शर्वं न यदि हृदि सर्वज्ञममलं
किमेते जानीरन् भवभयहरं राममपि वा ? ।
सदाऽस्मकं वन्द्याः कवय इह ते ज्ञानवरयो
यतो निःष्यन्दन्ते सरसशिवलीलालहरयः ॥

(१२३)

गिरां मे संस्कारो दुरितदमनो दर्पशमनो
मनोहासोल्लासो वितरतु सदा शं गुरुजनः ।
गुरौ वक्त्रे साक्षान्निपतति सुरेन्द्रोऽपि हि दिवो
ग्रहाणां वक्तृत्वं किमु यदि गुरुर्ञ्जलकरः ! ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(१२४)

द्राविन्द्रम्.

येषाञ्चेन्मकरन्मदविधुरा वाणी स्वयं प्राञ्जला
भक्त्या कर्णरसायनी पशुपतेः खण्डेन्दुचूडोज्वला ।
भूषा वक्कला ऽत्मपोषणपरा सर्वज्ञलीलारस-
स्तेषां हन्त महात्मनां त्रिभुवने लब्धुंकिमाशिष्यते ? ॥

(१२५)

बन्धो रीतिसमुज्वलः प्रतिपदं स्पर्धा च शब्दार्थयो-
श्छन्दो निर्झरतालमञ्जुनिनद च्छान्तिश्च मुख्यागमः ।
नित्यं कोमलकल्पना ऽमलकला स्वच्छा स्वतन्त्रा गति-
स्ते सर्वे भुवने भवन्ति सहजाः केषां हि पुण्यात्मनाम् ॥

(१२६)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुद्धिपत्रम्

श्लोकः	पादः	अशुद्धिः	शुद्धिः
	२	विषमपं	विषमपि
	,,	मन्धि	मूर्ध्नि
	२	ऽडमरु	डमरु
	४	सतत	सततं
	१	स्मितमुखी	स्मितमुखी
	३	वन्दित	वंन्दित
१	३	त्वसि	त्वमसि
२	२	विपद्ग्रस्व	विपदग्र त
	३	विश्वेकां	विश्वेशं
	४	ज्वालैलीढा	ज्वालैर्लीढा
३	४	भजंऽ	ऽभजं
४	१	ग्राम्य	ग्रम्य
	२	निशिद्धं	निषिद्धं
	४	पतितं	पतित
७	४	यद्यास्ति	यद्यस्ति
९	२	ऋष्यादाय	ऋव्यादाय
	,,	समनकुले	समनुकूले
१	३	रवि	रपि
	,,	द्युसरितः	द्युसरितः
१२	१	शहस्रं	सहस्रं
	३	दर्शन	दर्शन
२३	४	भूतित्रयमयी:	भूतित्रयमयः
२४	४	हरोऽपि	हरोऽपि

श्लोकः	पादः	अशुद्धिः	शुद्धिः
२६	१	लिङ्ग	लिङ्गं
,,	२	बिम्	विभुं
२९	१	निकरोत्तुङ्ग	निकरोत्तुङ्ग
३०	२	ऽस्फुट	स्फुट
३१	४	गहनम्	गहनाम्
३३	१	भवाल्यावन	भवाप्लावन
,,	३	चेतव	चेत्तव
३४	१	दलयितु	दलयितु
,,	२	महोऽशंवेर्धं	महोऽंशवेर्धं
,,	४	भ्रमवतान्	भ्रमवताम्
३५	१	नं	न
,,	,,	त्रिपुरमथन	त्रिपुरमथनं
३८	३	तिरिरूपि	तिरिरूपि
,,	,,	च्युतयथा	च्युतपथा
४०	१	त्रीथीमर्गं	त्रयीमार्गं
,,	३	स्तदखिलदन्	तदखिलमन
,,	४	स्वय	स्वयं
४१	२	सत्	सन्
४२	२	विभौ	विभो !
४३	३	मार्गनपि	मार्गनपि हि
४५	१	भजनन्त्थोके	भजन्त्योके
,,	,,	कतिपय	कतिपयो
,,	३	अहन्त्वेत्वां	अहन्त्वेतां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्लोक:	पाद:	अशुद्धि	शुद्धि:
४५	३	दृस्टौ	दृष्टौ
४६	४	तच्च	तच्च
४८	१	ध्वनै	ध्वन्यो
"	"	कतिपय	कतिपये
५०	२	विवर्णा	विवर्णा
५४	३	स्तोऽङ्घि	स्तोऽङ्घि
५५	३	विभूत्यो	विभूत्या
५६	३	स्थाते	स्थान्ते
५७	१	किम	किमु
"	३	श्चल	श्चेल
५८	१	त्यां	त्वां
,	३	लक्ष्यञ्छ	लक्ष्यञ्च
५९	२	यथा	पथा
६०	२	तावज्जतिरथे	तावज्च तिरथे
६१	२	किक्त	किज
६२	१	यस्यो	योऽस्यो
,,	३	सुपहैश्वर्थ	सुपहैश्वर्या
६३	२	ब्रह्मां	ब्रह्म
६४	२	श राङ्कोऽय	शशङ्कोऽयं
"	३	चेन्नीतोऽशे	चेदानीत:
६५	१	दिधक्षललो	दिधक्षल्लो

श्लोक:	पाद:	अशुद्धि	शुद्धि
"	२	किस	किल
"	४	यसरति	पसरति
६६	३	तमपि	तदपि
६८	३	त्व	त्वां
"	४	तज्ज्ञातव्यं	तज्ज्ञातव्यां
"	"	सम्यवशिर्ष्य	सम्यवशिष्यं
७०	३	हीनं	दीनं
७४	४	तत्वविरहितम्	तत्वद्विरहितम्
७५	२	वरा.	वर:
७७	२	सामग्रया	सामग्रया:
"	३	यथार्योऽर्या	यथार्यार्चा
७९	३	जनिष्टे	जनिष्ये
८४	४	परमयुतां	परमरिपुतां
८५	३	भर्ज:	भव:
१०१	१	तिष्ठन्त्व	तिष्ठञ्च
१०२	३	प्रत्यन्	प्रजल्पन्
१०७	१	शिवारण्दे	शिवाख्ये
११०	१	सकलाणि	सकलरिणा
"	४	चैतन्य	चैतन्यं
११५	४	पृथगात्मा	पृथगात्मा
११७	३	सदाऽवि	सदाऽङ्घि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संक्षिप्तपरिचयः

जन्मः- वि० सं० २००१ तमेऽब्दे प्रतिष्ठानपुर (प्यूठान) खेराग्रामे। दाङ्गविजौरीस्थितात् त्रि. वि. सं. अ. स. जनताविद्यापीठात् वि. स. ०३४ मिते वर्षे प्रथमश्रेण्यां साहित्याचार्यः। छात्रसमयत एव मण्डलस्तेषु आञ्चलिकेषु च साहित्यिककार्यक्रमेषु लब्धप्रमाणपत्रपदकादिः, महेन्द्रविद्याभूषणभूषितश्च। नेपालराजकीयप्रज्ञाप्रतिष्ठानसमायोजिते (२०३४) "बृहत्साहित्य भेला" कार्यक्रमे (२०३४) "रजतजयन्त्युत्सवे" च स्वराष्ट्यञ्चलात् साहित्यिक प्रतिनिधित्वेन संवृतः। संप्रति त्रि० वि० सं० अ० सं० वाल्मीकिविद्यापीठे काष्ठमण्डपप्रदर्शनीमार्गस्थे साहित्यविषयस्य सहायकः प्राध्यापकः।

अप्रकाशिताः कृतयः —

संस्कृतभाषायाम्

१. नौतिस्तवकम्
२. स्तुतिस्तवकम्
३. मुक्तकमल्लिका
४. गोविन्दलहरी
५. अलङ्कारसम्प्रदायव्यङ्ग्यार्थविवेचनम् (त्रि. वि. सं. अ. संस्थाने प्रस्तुतः शोधप्रबन्धः)

नेपालीभाषायाम्

१. यात्रा (उन्मुक्ताऽऽत्मपरकशैल्यांविरचितं बृहत्काव्यम्)
२. प्रालतपसी (महाकाव्यम्) (रचनाकाले)
३. सन्देशः (खण्डकाव्यम्)
४. अपूर्णा अन्याः काव्यकृतयो मुक्तकरचनाश्च ।

卐
卐卐

Jayatu Sanskritam, Kathmandu, Nepal